SAMPLE QUESTION PAPER

भारतीयदर्शनम् (347)

परीक्षासमयावधिः (Time. - होरात्रयम् (3 Hrs. पूर्णाङ्काः (Full Marks. – 100.

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 15, [C] भागे 6, [D] 6, [E] 4 इति आहत्य 51 प्रश्नाः सन्ति।

2) समे प्रश्ना अनिवार्याः।

3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।

4) A भागे प्र.सं. 1 तः 20 पर्यन्तं - वस्तुनिष्ठ/बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।

5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् - वस्तुनिष्ठप्रश्नाः/ मेलनम्,रिक्तस्थानानि,सत्यम्-असत्यम् इत्यादि। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।

6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं 30 तः 50 शब्दानां परिधिमध्ये समाधेयाः।

7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।

8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।

9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

10)स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।

11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

12)समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

13)निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

14)अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

[A] प्रश्नसङ्ख्या **1-20** बहुविकल्पप्रश्नाः सन्ति येषां कृते **20** अङ्काः आवंटिताः भवन्ति। **1x20=20**

1. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. असत्कार्यवादः कैः अङ्गीक्रियते?

क. बौद्धैः ख. सांख्यैः ग. नैयायिकैः घ. अद्वैतवेदान्तिभिः

अथवा

ब. विवर्तवादः केषाम्।

क) बौद्धानाम् ख) सांख्यानाम् ग) नैयायिकानाम् घ) अद्वैतवेदान्तिनाम्

2. एतेषु सत्कार्यवादाभ्युपगमे हेतुः नास्ति - 1

क. उपादानग्रहणात् ख. असदकरणात् ग. कार्याभावात् घ. कारणभावात्

3. एकादशको गणः कस्मात् तत्त्वात् उत्पद्यते? – 1

क.प्रकृतेः ख.महत्तत्त्वात् ग.तमःप्रधानाद् अहङ्कारात्

घ. सत्त्वप्रधानात् अहङ्कारात्

4. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. सांख्यमते अहङ्कारस्य उपादानकारणं किम्?

क. प्रकृतिः ख. महत् ग. तन्मात्राणि घ. इन्द्रियाणि

अथवा

ब. व्यक्ताव्यक्तयोः कति वैधर्म्याणि सांख्यकारिकायां निगदितानि।

क) नव ख) अष्टौ ग) पञ्च घ) एकादश

5. वेदान्तमते अभावग्रहणे कः सन्निकर्षः? 1

क. संयोगः ख. संयुक्ततादात्म्यः ग. तादात्म्यः घ. न कोऽपि

6. वेदान्तमते परार्थानुमाने कति अवयवाः भवन्ति? 1

क. त्रयः ख. चत्वारः ग. पञ्च घ. षट्

7. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. वेदान्तमते सिद्धान्तपक्षे लक्षणायाः बीजं किम्?

क. अन्वयानुपपत्तिः ख. तात्पर्यानुपपत्तिः ग. अर्थानुपपत्तिः घ. शब्दानुपपत्तिः

अथवा

ब. वेदान्तमते वाक्यार्थबोधे सहकारिकारणानि कति?

क. त्रीणि ख. चत्वारि ग. पञ्च घ. न किमपि

8. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. अभावग्रहणाय वेदान्तिनः किं प्रमाणं स्वीकुर्वन्ति?

क. प्रत्यक्षम् ख. अनुमानम् ग. अर्थापत्ति घ. अनुपलब्धि

अथवा

ब. उपपाद्यज्ञानेन उपपादककल्पनम् इति कस्य प्रमाणस्य लक्षणम्?

क. अनुपलब्धेः ख. अर्थापत्तेः ग. उपमानस्य घ. पुराणस्य

9. वेदान्तमते अभावः कतिविधः? 1

क. त्रिविधः ख. चतुर्विधः ग. द्विविधः घ. षड्विधः

10. पर्वतो वह्निमान् धूमात् इत्यत्र साध्यः कः? 1

क. पर्वतः ख. वह्निः ग. धूमः घ. महानसमः

**11.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. अध्यासः कतिविधः।

क. द्विविधः ख. त्रिविधः ग.चतुर्विधः घ. पंचविधः

अथवा

ब. अर्थाध्यासः कतिविधः।

क. द्विविधः ख. त्रिविधः ग.चतुर्विधः घ. पंचविधः

12. के अनिर्वचनीयख्यातिं स्वीकुर्वन्ति? 1

क. माध्यमिकाः ख. शून्यवादिनः ग. अद्वैतवेदान्तिनः घ. नैयायिकाः

13. सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तिनां कः न्यायः प्रसिद्धः? 1

क. तृणारणिमणिन्यायः ख. शाखाचन्द्रमसन्यायः ग. अध्यारोपापवादन्यायः घ. तिलतण्डुलन्यायः।

14. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. अद्वैतमते किदृशी परमेश्वरस्य सृष्टिप्रवृत्तिः?

क. सप्रयोजना ख. लीलारूपा ग. भोगरूपा घ. मोक्षरूपा

अथवा

ब. संकल्पविकल्पात्मिका अन्तःकरणवृत्तिः का?

क. मनः ख. बुद्धिः ग. चित्तम् घ. अहङ्कारः

15. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. वेदान्तमते प्रलयः कतिविधः?

क. द्विविधः ख. त्रिविधः ग. चतुर्विधः घ. षड्विधः

अथवा

ब. अज्ञानोपहितात् चैतन्यात् प्रथमोत्पन्नं महाभूतं किम्?

क. वायुः ख. आकाशःग. जलम् घ. तेजः

16. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. कस्याम् उपनिषदि तेजःप्रमुखा सृष्टिः प्रतिपाद्यते?

क. तैत्तिरीयोपनिषदि ख. कठोपनिषदि ग. बृहदारण्यकोपनिषदि घ. छान्दोग्योपनिषदि

अथवा

ब. अद्वैतवेदान्तमते सूक्ष्मशरीरे कति अवयवाः विद्यन्ते?

क. एकादश ख. त्रयोदश ग. सप्तदश घ. षोडशः

17. किं नाम प्रमा। 1

क. मिथ्याज्ञानम् ख.अयथार्थज्ञानम् ग. यथार्थज्ञानम् घ. . न कोऽपि

अथवा

किं नाम अप्रमा ।

क. मिथ्याज्ञानम् ख.अयथार्थज्ञानम् ग. यथार्थज्ञानम् घ. न कोऽपि

**18.** ज्ञानस्य उच्छेदः उत्तरज्ञानबाध्यत्वं किं। 1

क. ज्ञानस्य अवसाद**:** ग. यथार्थज्ञानम् ग. मुक्तिः घ. न कोऽपि

19. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. विषयेभ्यो बाह्येन्द्रियाणां निग्रहः किमुच्यते।

क. शमः ख. दमः ग. उपरतिः घ. वैराग्यम्

अथवा

ब. तात्पर्यनिर्णायकेषु षट्सु लिङ्गेषु अन्यतमं हि-

क. विवेकः ख. वैराग्यम् ग. प्रयोजनम् घ. उपपत्तिः

20. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. विवेकानन्दस्य आध्यात्मिकः गुरुः कः आसीत्?

क. देवेन्द्रनाथः ख. तोतापुरी ग. श्रीरामकृष्णः घ. शिवानन्दः

अथवा

ब. योगचतुष्टयम् न गण्यते।

क. ज्ञानयोगः ख. भक्तियोगः ग. तंत्रयोग: घ. राजयोगः

**{B}** प्रश्नसङ्ख्या **21-35** वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं **30** अङ्काः आवंटिताः भवन्ति ।

**2x15=30**

**21.** अधोलिखितेषु रिक्तस्थानेषु कस्यापि एकम् उत्तरं ददातु। **2**

(क) प्राणः, …………, व्यानः, …………, समानश्चेति पञ्च वायवः।

(ख) शब्दस्पर्श ...... रसगन्धाः पञ्च ........ ।

22. अधोलिखितेषु रिक्तस्थानेषु कस्यापि एकम् उत्तरं ददातु। 2

(क) ............ मनसि अन्तर्भावः। चित्तस्य ........ अन्तर्भावः।

(ख) प्रत्यक्षज्ञानं ...... विधम् सविकल्पक............. भेदात्।

**23.** अधोलिखितेषु रिक्तस्थानेषु कस्यापि एकम् उत्तरं ददातु। **2**

(क) ............, ................. भेदेन अनुमानं द्विविधम्।

(ख) सन्निहिते गवये ............ ज्ञानम् उपमानप्रमाणम्। असन्निहिते गवि गवयसादृश्यज्ञानम् ......... ।

24. अधोलिखितेषु रिक्तस्थानेषु उत्तरं ददातु।

वेदान्तशास्त्रे ........... प्रमाणस्य द्वौ भेदौ वर्णितौ ............ अपौरुषेयश्च।

**25.** अधोलिखितेषु रिक्तस्थानेषु उत्तरं ददातु। 2

अर्थापत्तेः द्वौ भेदौ स्तः। ............ श्रुतार्थापत्तिः च। श्रुतार्थापत्तेः द्वौ भेदौ स्तः। ............. अभिहितानुपपत्तिश्चेति।

**26.** अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु। **2**

(क) तरति शोकमात्मवित् इति श्रुतिः। सत्यम्/असत्यम्

(ख) भविष्यतीति प्रतीतिविषयः अभावः प्रध्वंसाभावः । सत्यम्/असत्यम्

(ग) अन्योन्याभावः त्रिविधः भवति । सत्यम्/असत्यम्

27. अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु। 2

**(क)** अज्ञानस्य आवरणविक्षेपरूपं शक्तिद्वयं विद्यते। सत्यम्/असत्यम्

(ख) आवरणशक्त्या वस्तुस्वरूपम् न आच्छाद्यते। सत्यम्/असत्यम्

(ग) विक्षेपशक्त्या नूतनं वस्तु प्रतीयते। सत्यम्/असत्यम्

28. अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु।

**2**

**(क)** चित्तस्य शुद्धये नित्यादीनि कर्माणि अष्ठेयानि। सत्यम्/असत्यम्

(ख) काम्यं निषिद्धं नित्यं नैमित्तिकम् प्रायश्चित्तञ्चेति पञ्चविधानि कर्माणि प्रथन्ते। सत्यम्/असत्यम्

(ग) यः कर्मयोगं करोति, फलाशया कर्म न करोति स कर्मबद्धो भवति। सत्यम्/असत्यम्

29. अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु। **2**

(क) शीतोष्णादिद्वन्द्वसहनं वैराग्यमुच्यते। सत्यम्/असत्यम्

(ख) श्रवण-मनन-निदिध्यासनानि ब्रह्मसाक्षात्कारं प्रति कारणानि। सत्यम्/असत्यम्

(ग) शमः दमः उपरतिः तितिक्षा श्रद्धा समाधानम् इति एतत् साधनचतुष्टयपदाभिधेयानि । सत्यम्/असत्यम्

30. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। **2**

(क) धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु काम एव परमपुरुषार्थः। सत्यम्/असत्यम्

(ख) "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति अद्वैतवेदान्तसिद्धान्तः। सत्यम्/असत्यम्

31.मेलनं कुरु - 2

(क) किं नैमित्तिकं कर्म — क.ज्योतिष्टोमः

ख. जातेष्ट्यादिकम्

(ख). प्रायश्चित्तम् कर्म — ग.चान्द्रायणादीनि

घ. सन्ध्यावन्दनादीनि

32. मेलनं कुरु - 2

(क) विपरीतभावनाया निवर्तकं किम्। — क. श्रवणम्

ख. निदिध्यासनम्

(ख) चित्तविक्षेपस्य शामकं किम्। — ग. मननम्

घ. उपासना

33. मेलनं कुरु - 2

(क) शौचं कतिविधं — क. पञ्च

ख. द्वि

(ख) यमा: कति धा: — ग. त्रि

घ. दश

34. . मेलनं कुरु - 2

(क) निर्विकल्पकसमाधेः कति विघ्नाः सन्ति। — क. पञ्च:

ख. चत्वारः

(ख). निर्विकल्पकसमाधेः कति अङ्गानि सन्ति। — ग. दश:

घ. अष्टौ

35. मेलनं कुरु - 2

(क) अद्वैतवेदान्तमते मुक्तिः क.सदानन्दयोगीन्द्रः

ख. स्वामी विवेकानन्द:

(ख).वेदान्तसारस्य लेखकः ग. द्विविधा

घ त्रिविधा

**[C].** षट्-प्रश्नानां यथानिर्देशम् लघूनि उत्तराणि लिखत। **2 X 6**

36.का बुद्धिः? किं च चित्तम्? 2

अथवा

किं नाम निर्विकल्पं ज्ञानम्? उदाहरणम् एकं लिखत।

37. पौरुषेयत्वं नाम किम्? योग्यता नाम का? 2

अथवा

वेदान्ते कति प्रमाणानि सन्ति?कानि तानि।

38. अर्थापत्तिः कतिविधा भवति? नामानि लिखत। 2

अथवा

वेदान्तमते अभावभेदः कति सन्ति? नामानि लिखत।

**39.** अद्वैतवेदान्तस्य प्रतिपाद्यविषयः कः? अस्य शास्त्रस्य प्रयोजनं किम्। 2

40. अख्यातिवादिनः के? असत्ख्यातिवादिनः के। 2

**41.** अद्वैतवेदान्तमते सत्ता कतिविधा? का च ताः? 2

**[D].** षट्-प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त। **3 X 6**

42. सांख्यदर्शनानुसारेण सृष्टिक्रमः प्रतिपाद्यताम्। 3

अथवा

ज्ञानेन्द्रियाणि विषये लघुटिप्पणीं लिखत

43. सांख्यदर्शने सत्कार्यवादः स्वरूपमिति विषयमाश्रित्य लघुप्रबन्धं लिखत। 3

अथवा

सांख्यकारिकायां सत्कार्यवादस्य कारणानि इति विषयमाश्रित्य लघुप्रबन्धं लिखत।

44. न्यायसम्मतः स्वार्थानुमान विषये लघुटिप्पणीं लिखत। 3

अथवा

न्यायसम्मतः परार्थानुमान विषये लघुटिप्पणीं लिखत

45. अज्ञानस्य शक्तिद्वयं विव्रियताम्। 3

46. काम्यं नित्यं नैमित्तिकं च कर्म समासेन वर्ण्यताम्। 3

47. वेदान्तशास्त्रस्य अनुबन्धचतुष्टये किं तावत् प्रयोजनमिति विषयमाश्रित्य लघुप्रबन्धं लिखत। 3

**[E].** चत्वारः दीर्घोत्तरैः समाधेयाः। **5 X 4**

48. तत्त्वमसि इति महावाक्यात् कथं निर्विकल्पकं ज्ञानं भवति इति पर्यालोचयत। 5

अथवा

वेदान्तमते शब्दप्रमाणस्य लक्षणं संक्षेपेण प्रतिपाद्यताम्।

49. वेदान्तमते सृष्टिक्रमः संक्षेपेण प्रतिपाद्यताम्। 5

50. वेदांतसारमते निदिध्यासनस्वरूपम् संक्षेपेण वर्णयत। 5

अथवा

समाधेः आवश्यकताविचारः प्रतिपाद्यताम्।

51.विवेकानन्दस्य समन्वयभावं संक्षेपेण वर्णयत। 5

Marking Scheme

भारतीयदर्शनम् (Bharatiya Darshan (347)

परीक्षासमयावधिः (Time. - होरात्रयम् (3 Hrs. पूर्णाङ्काः (Full Marks. -100

| S.N | Answer | Marks |
|---|---|---|
| 1. | अ. ग नैयायिकैः<br><br>अथवा<br><br>ब. घ अद्वैतवेदान्तिनाम् | 1 |
| 2. | ग. कार्याभावात् | 1 |
| 3. | घ. सत्त्वप्रधानात् अहङ्कारात् | 1 |

| | | |
|---|---|---|
| 4. | अ. ख महत्<br><br>अथवा<br><br>ब. क नव | 1 |
| 5. | घ न कोऽपि | 1 |
| 6. | क त्रयः | 1 |
| 7. | अ. ख. तात्पर्यानुपपत्तिः<br><br>अथवा<br><br>ब. ख. चत्वारि | 1 |
| 8. | अ. घ. अनुपलब्धि<br><br>अथवा<br><br>ब. ख. अर्थापत्तेः | 1 |
| 9. | ख. चतुर्विधः | 1 |
| 10. | ख. वह्निः | 1 |

| | | |
|---|---|---|
| 11. | अ. क. द्विविधः<br>अथवा<br>ब. ख. त्रिविधः | 1 |
| 12. | ग. अद्वैतवेदान्तिनः | 1 |
| 13. | ग. अध्यारोपापवादन्यायः | 1 |
| 14. | अ. ख. लीलारूपा<br>अथवा<br>ब. क. मनः | 1 |
| 15. | अ. ग. चतुर्विधः<br>अथवा<br>ब. ख. आकाशः | 1 |
| 16. | अ. घ. छान्दोग्योपनिषदि<br>अथवा<br>ब. ग. सप्तदश | 1 |
| 17. | अ. ग. यथार्थज्ञानम्<br>अथवा<br>ब. ख. अयथार्थज्ञानम् | 1 |

| | | |
|---|---|---|
| | | |
| 18. | क. ज्ञानस्य अवसादः | 1 |
| 19. | अ. ख. दमः<br><br>अथवा<br><br>ब. घ. उपपत्तिः | 1 |
| 20. | अ. ग. श्रीरामकृष्णः<br><br>अथवा<br><br>ब. ग. तंत्रयोगः | 1 |
| 21. | (i) अपानः/उदानः<br><br>(ii) रूप/ तन्मात्राणि | 2 |
| 22. | (i) अहङ्कारस्य/ बुद्धौ<br><br>(ii) द्वि/निर्विकल्पक | 2 |
| 23. | (i) स्वार्थानुमान/परार्थानुमान<br><br>(ii) गोसादृश्य /उपमितिः | 2 |

| | | |
|---|---|---|
| 24. | आगम/ पौरुषेयः | 2 |
| 25. | दृष्टार्थापत्तिः/अभिधानानुपपत्तिः | 2 |
| 26. | (i) सत्यम्<br>(ii) असत्यम्<br>(iii) असत्यम् | 2 |
| 27. | (i) सत्यम्<br>(ii) असत्यम्<br>(iii) सत्यम् | 2 |
| 28. | (i) सत्यम्<br>(ii) सत्यम्<br>(iii) असत्यम् | 2 |
| 29. | (i) असत्यम्<br>(ii) सत्यम्<br>(iii) असत्यम् | 2 |
| 30. | (i) असत्यम्<br>(ii) सत्यम् | 2 |

| | | |
|---|---|---|
| 31. | (i) ख. जातेष्ट्यादिकम्<br><br>(ii) ग.चान्द्रायणादीनि | 2 |
| 32. | (i) ख. निदिध्यासनम्<br><br>(ii) घ. उपासना | 2 |
| 33. | (i) ख. द्वि<br><br>(ii) क. पञ्च | 2 |
| 34. | (i) घ. अष्टौ ख. चत्वारः<br><br>(ii) घ. अष्टौ | 2 |
| 35. | (i) ग. द्विविधा<br><br>(ii) क.सदानन्दयोगीन्द्रः | 2 |
| 36. | निश्चयाकारा अन्तकरणस्य वृतिः हि बुद्धिः।<br>स्मृत्याकारा अन्तःकरणवृत्तिः चित्तम्।<br><br>अथवा<br><br>संसर्गानवगाहि ज्ञानम् निर्विकल्पकम्।<br><br>उदाहरणं हि- सोऽयं देवदत्तः, तत्त्वमसि इत्यादिकम्। | 2 |

| | | |
|---|---|---|
| 37. | सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं हि पौरुषेयत्वम्।<br>तात्पर्यविषयसंसर्गाबाधः योग्यता।<br>अथवा<br>वेदान्तशास्त्रे षट् प्रमाणानि सन्ति। तानि च प्रत्यक्षम् अनुमानम् उपमानम् शब्दः अर्थापत्तिः अनुपलब्धिश्चेति। | 2 |
| 38. | *अर्थापत्तिः* द्विविधा *भवति* । दृष्टार्थापत्तिः श्रुतार्थापत्तिः च।<br>अथवा<br>अभावः च वेदान्तमते चतुर्विधः अस्ति। तथाहि प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावः च। | 2 |
| 39. | अद्वैतवेदान्ते प्रतिपाद्यविषयः तावत् जीवब्रह्मणोरैक्यं, मुक्तिश्च शास्त्रस्यास्य प्रयोजनम्। | 2 |
| 40. | मीमासकाः अख्यातिवादिनः वेदान्तिनश्च असत्ख्यातिवादिनः | 2 |
| 41. | सत्ता त्रिविधा। पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी च। | 2 |

| | | |
|---|---|---|
| 42. | .1.1) सृष्टिक्रमः -<br><br>अस्तु तावत् पङ्ग्वन्धवत् प्रकृतिपुरुषयोः संयोगः। किम् तेन सिध्यति इति चेत् उच्यते - 'तत्कृतः सर्गः' इति। प्रकृतिपुरुषसंयोगात् हि सृष्टिर्भवति। तत्र उपादानकारणं तावत् प्रकृतिरेव। तथाहि उच्यते सृष्टिक्रमः -<br><br>प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।<br><br>तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि।। इति। [सांख्यकारिका २२]<br><br>प्रधानात् महत्तत्वम् अर्थात् बुद्धिः जायते, महत्तत्वात् अहङ्कारः उत्पद्यते, तस्मात् अहङ्कारात् षोडशकः गणः जायते। कः स षोडशकः गणः इति चेत् एकादशेन्द्रियाणि पञ्च तन्मात्राणि चेति षोडशको गणः। तस्मादपि षोडशकात् गणात् पञ्चभ्यः पञ्चतन्मात्रेभ्यः पञ्च भूतानि पञ्चमहाभूतानि आकाशादीनि जायन्ते इति कारिकार्थः।<br><br>प्रकृतिः<br>▼<br>महत्<br>▼<br>अहङ्कारः<br>▼<br>मनः चक्षुः श्रोत्रं जिह्वा नासिका त्वक् वाक् पाणिः पादः पायुः उपस्थः<br>शब्दः स्पर्शः रूपं रसः गन्धः (षोडशकः गणः)<br>↓ ↓ ↓ ↓ ↓<br>आकाशः वायुः तेजः जलम् पृथिवी<br><br>तत्र शब्दतन्मात्राद् आकाशं शब्दगुणं जायते, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायुः शब्दस्पर्शगुणः, शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणं, शब्दस्पर्शरूपतन्मात्रसहिताद् रसतन्मात्राद् आपः शब्दस्पर्शरूपरसगुणाः, शब्दस्पर्शरूपरसतन्मात्रसहितात् गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायते। | 3 |

| | | |
|---|---|---|
| | पञ्चविंशतितत्त्वमध्ये पुरुषः प्रकृतिश्च न कुतश्चित् सृज्यते। तयोः स्वरूपमपि प्राग् विस्तरेण निगदितम्। इदानीं प्रकृतितः यानि तत्त्वानि सृष्टानि तेषां विषये क्रमेण आलोचनं करिष्यते।<br><br>अथवा<br><br>ज्ञानेन्द्रियाणि -<br><br>श्रोत्रचक्षुस्त्वग्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि। तत्र ज्ञानसाधनानि इन्द्रियाणि ज्ञानेन्द्रियाणि। श्रवणादिकार्यद्वारा ज्ञानसाधनत्वात् इन्द्रियाणां तत्पदाभिधेयत्वम्। ज्ञानार्थमिन्द्रियाणीति वा ज्ञानेन्द्रियाणि। तथाहि उच्यते -<br><br>एवं श्रोत्रं त्वचो नेत्रं रसना नासिका तथा।<br><br>पञ्च बुद्धीन्द्रियाण्याहुः शास्त्रज्ञा हि विचक्षणाः।। इति।<br><br>श्रोत्रादीनां पञ्चानां इन्द्रियाणां पञ्च वृत्तयः सन्ति। तथाहि श्रोत्रस्य कार्यं शब्दश्रवणं, त्वचः स्पर्शग्रहणम्, चक्षुषोः रूपदर्शनं, रसनायाः रसग्रहणम्, घ्राणस्य च गन्धग्रहणम् इति। तत्र वृत्तिः व्यापारः। तथा च अक्षपादसूत्रम् - “गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः” इति। अत्र वात्स्यायनभाष्यम् - “पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रमम् अर्थाः विषयाः इति”।। तथा चोक्तम् -<br><br>शब्दः स्पर्शश्च रूपं च रसो गन्धो ह्यनुक्रमात्।<br><br>बुद्धीन्द्रियाणां विषयाः समाख्याता महर्षिभिः।। इति। | |

| | | |
|---|---|---|
| 43. | सत्कार्यवादः<br><br>भारतीयदर्शनेषु सत्कार्यवादः अत्यन्तं प्रसिद्धः। सांख्यदर्शने सत्कार्यवादः स्वीक्रियते। कः नाम सत्कार्यवादः इति चेत् कार्यम् उत्पत्तेः प्राक् विद्यमानम् अस्ति न वेति प्रश्ने दार्शनिकानां भिन्नमतानि सन्ति। तत्र शून्यवादिबौद्धानां मते कारणम् हि अभावात्मकम् असत्, ततः सत् कार्यम् उत्पद्यते इति। आरम्भवादिनः नैयायिक-वैशेषिकाः वदन्ति यत् उत्पत्तेः प्राक् कार्यम् असत्, अर्थात् विद्यमानं न तिष्ठति, नूतनम् एव कार्यं कारणात् उत्पद्यते इति। तस्मात् ते असत्कार्यवादिनः इति। अद्वैतवेदान्तिनां मते कारणमेव वस्तुतः सत्, ततः अनिर्वचनीयम् एव कार्यम् उत्पद्यते। एते विवर्तवादिनः। सांख्यानां मते उत्पत्तेः प्राक् कार्यं सत्, अर्थात् उत्पत्तेः प्राक् कार्यं कारणे अव्यक्तरूपेण विराजते, तस्मात् ते सत्कार्यवादिनः। तथाहि एतन्मते तिलेभ्यः तैलं यदा उत्पद्यते तदा तैलः तिलेषु पूर्वतः एव अव्यक्तरूपेण विराजते इति अङ्गीकरणीयम्। तिले तैलं पूर्वतः अविद्यमानं चेत् तदेव कार्यं न कदापि उत्पद्येत। एवं सतः भावरूपात् प्रधानादेः सत् कारणे विद्यमानमेव अव्यक्तरूपं कार्यं जायते कारकव्यापारेण अभिव्यज्यते। जायते उत्पद्यते इत्यादिशब्दानाम् सम्पूर्णतः नूतनस्य वस्तुनः सृष्टौ न तात्पर्यं ग्राह्यम्, अपि तु अव्यक्तरूपाद् व्यक्तरूपेण अभिव्यक्तौ तात्पर्यम् अवधेयम्।<br><br>अथवा<br><br>सत्कार्यवादाभ्युपगमे कारणानि -<br><br>सत्कार्यवादाभ्युपमगे सांख्यानां स्वकीयाः युक्तयः सन्ति। तथाहि उच्यते सांख्यकारिकायाम् -<br><br>असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।<br><br>शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।। इति। [९]<br><br>सांख्यकारिकायां सत्कार्यवादस्य अभ्युपगमे पञ्च कारणानि प्रदर्शितानि। तानि हि - १. असदकरणात् २. उपादानग्रहणात् ३. सर्वसम्भवाभावात् ४. शक्तस्य शक्यकरणात् ५. कारणभावात् चेति। | 3 |

| | | |
|---|---|---|
| | कारणव्यापाराद् ऊर्ध्वमिव ततः प्रागपि सदेव कार्यम्, कुतः। (१) असदकरणात्- असतः कर्तुम् अशक्यत्वात् सदेव हि कर्तुं शक्यते नासदिति। पुनः कस्मात्। (२) उपादानग्रहणात्- कारणैः सह कार्यस्य सम्बन्धात्-- कार्येण सम्बद्धं हि कारणं कार्यस्य जनकं भवति नासम्बद्धं, सम्बन्धश्च कार्यस्य असतः न सम्भवति, तस्मात् सदिति। पुनः कस्मात्। (३) सर्वसम्भवाभावात् -- कस्यचित् उत्पत्तये किञ्चिद् उपादीयते, न तु सर्वस्य उत्पत्तये सर्वम् उपादीयते इति कार्यकारणत्वयोः नियमः उत्पत्तेः प्राक् कार्यस्य असत्त्वपक्षे न उपपद्यते, घटोत्पादनार्थं मृत्तिका गृह्यते, न तन्त्वादि, यदि उत्पत्तेः प्राग् असदेव कार्यं स्यात् तदा कार्यासत्त्वस्य सर्वत्र अविशेषात् तन्त्वादिभ्योऽपि घट उत्पद्येत, न च उत्पद्यते, तस्मात् न कार्यम् असत्, सत्त्वपक्षे तु घटस्य मृत्तिकायां सत्त्वात् मृत्तिकातः घटोत्पत्तिः सम्भवति, असम्बद्धस्य जन्यत्वे तु सर्वं कार्यजातं सर्वस्मात् भवेत्, न चैतदस्ति, तस्मात् सदिति। पुनः कस्मात्। (४) शक्तस्य शक्यकरणात् -- शक्तेन हि कार्यं क्रियते न अशक्तेन, यतः शक्तं कारणं शक्तिसम्बद्धमेव शक्यं करोति, न असम्बद्धमिति शक्तस्य शक्यकार्यकरणान्न असतः उत्पत्तिः इत्यर्थः। कारणे तदात्मना वर्तमाना कार्यस्य अव्याकृतावस्थारूपा अनागतावस्था एव कार्यनियामिका शक्तिः, तया सम्बद्धं कार्यं च शक्यमिति अनागतावस्थावत्त्वेन कारणे कार्यस्य सत्त्वात् न कार्यस्य असत्त्वमिति तत्त्वम्। पुनः कस्मात्। (५) कारणभावात् -- कार्यस्य कारणात्मकत्वात् इत्यर्थः, न हि कारणाद् भिन्नं कार्यं, कारणं च सदिति कथं तदभिन्नं कार्यम् असद् भवेत्, तस्मात् सदिति। | |

| | | |
|---|---|---|
| 44. | स्वार्थानुमानम्<br><br>अनुमितिकरणम् अनुमानम्। अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या। स्वार्थानुमानपरार्थानुमानभेदेन अनुमानं द्विविधम्। तत्रादौ स्वार्थानुमानं किमिति उपस्थाप्यते। अनुमानक्रमविषये नैयायिकवेदान्तिनोः मतभेदाः सन्ति। तत्रादौ नैयायिकसम्मतः अनुमानक्रमः प्रदर्श्यते।<br><br>**न्यायसम्मतः स्वार्थानुमानक्रमः**<br><br>स्वस्य अनुमातुः अर्थः प्रयोजनं साध्यसंशयनिवृत्तिरूपः यस्मात् तत् स्वार्थानुमानम्। तस्य क्रमः स्वार्थानुमानक्रमः।<br><br>लोके व्यवहारकाले यत्र यत्र धूमः तत्र तत्र वह्निः इति सहचारदर्शनम्, एवञ्च व्यभिचारस्य अदर्शनं भवति तदा धूमः वह्निव्याप्यः इति व्याप्तिविषयकं प्रत्यक्षं ज्ञानं जायते। धूमः अत्र व्याप्यः, वह्निः व्यापकः, वह्निव्याप्तिः धूमे। एवञ्च धूमः लिङ्गं हेतुर्वा उच्यते। व्याप्तिज्ञाने अस्मिन् लिङ्गं विषयः अस्ति। अतः इदं ज्ञानं प्रथमलिङ्गपरामर्शः इत्यपि कथ्यते।इत्यादि.........<br><br>अथवा<br><br>परार्थानुमानम्<br><br>यस्य पर्वतो वह्निमान् इति निश्चयः अस्ति तं प्रति कश्चिदपरः प्रतिवादी पर्वते वह्निं सन्दिहानः पृच्छति यद् पर्वतः वह्निमान् न वा। निश्चयवान् जनः सन्दिहानस्य संशयनिवारणाय अवयववाक्यप्रयोगेण अनुमानप्रमाणं प्रदर्शयति। इदं परार्थानुमानम्। परस्य अर्थः प्रयोजनं साध्यसंशयनिवृत्तिरूपः यस्मात् तत् परार्थानुमानम्। अनेन परार्थानुमानेन प्रतिवादिनः संशयनिवृत्तिः भवति, किञ्च साध्यनिश्चयः जायते। अयं निश्चयः एव परार्थानुमितिः कथ्यते।<br><br>परार्थानुमितिजननाय एकं वाक्यं प्रयुज्यते। तस्य क्रमेण त्रयः अवयवाः सन्ति। स च क्रमः प्रदर्श्यते।<br><br>**परार्थानुमानक्रमः** | 3 |

| | | |
|---|---|---|
| | यस्य साध्यनिश्चयः अस्ति सः अपरः यस्य साध्यसंशयः अस्ति तं परं प्रति क्रमेण वाक्यानि वदति। यथा -<br><br>पर्वतः वह्निमान्। अयं प्रथमः अवयवः। इयं प्रतिज्ञा कथ्यते। अस्माद् वाक्यात् साध्यं किमिति ज्ञायते। यथा वह्निः साध्यः इति ज्ञायते। एवञ्च सन्दिग्धसाध्यवान् पर्वतः इति ज्ञानम् उत्पन्नम्। सन्दिग्धसाध्यस्य आश्रयः एव पक्षः कथ्यते। अतः प्रतिज्ञावाक्यात् पक्षज्ञानमपि जायते। पक्षज्ञानं विना पक्षधर्मताज्ञानं न सम्भवति। अतः पक्षज्ञानं पक्षधर्मताज्ञानस्य प्रयोजकं भवति।<br><br>इत्यादि.......... | |
| 45. | • प्रसङ्गवर्णनम् अर्थात् अज्ञानस्य परिचयः प्रदेयः<br>• आवरणशक्तेः वर्णनम्, उदाहरणं च।<br>• विक्षेपशक्तेः वर्णनम्, उदाहरणं च।<br><br>कथम् अज्ञानं ब्रह्मस्वरूपम् आवृत्य जगत् विक्षिपति इति विषयस्य उल्लेखः। | 3 |
| 46. | • प्रसङ्गः वक्तव्यः अर्थात् काम्यादिकर्माणि अधिकारिविचारप्रसङ्गे मोक्षसाधनविचारप्रसङ्गे वा वर्णितानि<br>• काम्यस्य लक्षणम् उदाहरणं च वक्तव्यम्<br>• नित्यस्य लक्षणम् उदाहरणं च वक्तव्यम्<br><br>नैमित्तिकस्य कर्मणः लक्षणम् उदाहरणं च वक्तव्यम् | 3 |
| 47. | • अनुबन्धचतुष्टये प्रयोजनम् अन्यतमम्। प्रयोजनं विना न मन्दानाम् अपि प्रवृत्तिः<br><br>अविद्यानिवृत्तिः परमानन्दावाप्तिश्च प्रयोजनम्अविद्यानिवृत्तिरेव मोक्षः, पुरुषार्थेषु मूर्धन्यभूतः। | 3 |

| | | |
|---|---|---|
| 48. | सन्दर्भः वक्तव्यः अर्थात् किमर्थं महावाक्यानि उपनिषत्सु सन्निविष्टानि। किमर्थं च तेषां महत्त्वम्।<br><br>किं नाम निर्विकल्पकं ज्ञानम्।<br><br>तत्त्वमसीति महावाक्यात् कथं निर्विकल्पकं ज्ञानं नाम संसर्गानवगाहि ज्ञानं भवतीति वर्णनीयम्।<br><br>तत्-त्वम्-पदयोः प्रथमान्तत्वेन सामानाधिकरण्यम्। परन्तु सर्वज्ञत्वम् अल्पज्ञत्वम् इति तयोः परस्परं विरुद्धता। अतः सर्वज्ञत्व-अल्पज्ञत्वयोः धर्मयोः परित्यागेन चैतन्यमात्रे पर्यवसानम् इति संसर्गानवगाहि ज्ञानम्। | 5 |
| 49. | • प्रसङ्गः अर्थात् अद्वैतवेदान्तमते जगतः सृष्टिकारणम् ईश्वरः। स च ईश्वरः मायाम् आश्रित्य आकाशादिक्रमेण सृष्टिं करोति इति विषयस्य वर्णनं प्रथमं कार्यम्<br><br>• सृष्टानां सूक्ष्मभूतानां क्रमेण उल्लेखः करणीयः। श्रुतिप्रमाणं च देयम्<br><br>• पञ्चीकरणस्य उल्लेखः। येन सूक्षभूतेभ्यः स्थूलभूतोत्पत्तिः भवति<br><br>• आकाशादीनां सात्त्विकांशेभ्यः ज्ञानेन्द्रियाणाम् उत्पत्तिः, अन्तःकरणस्य च उत्पत्तिः<br><br>• आकाशादीनां रजोऽंशेभ्यः कर्मेन्द्रियाणाम् उत्पत्तिः। मिलितानां सूक्ष्मभूतानां कार्याणि | 5 |

| | | |
|---|---|---|
| 50. | निदिध्यासनस्वरूपम्<br><br>निदिध्यासनस्वरूपविषये उच्यते वेदान्तसारे - “विजातीय-देहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्” इति। जाग्रदवस्थायां विविधविषयाणां ज्ञानमस्माकं भवति। अज्ञाननाशाद् एव ज्ञानं जायते। चित्तवृत्तिः अज्ञानं नाशयति। अतः ज्ञानस्थले अवश्यं चित्तवृत्तिः उत्पद्यते। तथाहि घटज्ञानादनन्तरं पटज्ञानं, पटज्ञानादनन्तरं दण्डज्ञानमेवं विविधज्ञानानाम् उत्पत्तेः जाग्रदवस्थायां चित्तवृत्तयोऽपि क्षणानन्तरमेव भिद्यन्ते। तेन चेतसः स्थिरता न सम्भवति। यदि एकस्य घटस्यैव निरन्तरं ज्ञानं भवेत् तदा निरन्तरं घटविषयिणी चित्तवृत्तिर्भवति, तेन च चित्तस्य स्थिरता सम्भवति। यदा निरन्तरम् एकजातीया एव चित्तवृत्तिर्भवति तदा चित्तं विविधविषयेषु न गच्छतीति हेतोः चित्तं स्थिरम् इति कथ्यते।<br><br>निदिध्यासनं हि मोक्षजनकम्। अतो न हि घटपटादिविषये निरन्तरचित्तवृत्तिप्रवाहः निदिध्यासनं भवति।“तमेव विदित्वातिमृत्युमेति”, “तं त्वौपनिषदं पुरुषं पृच्छामि” इत्यादिश्रुतिषु ज्ञायते यद् उपनिषत्प्रतिपादितस्य ब्रह्मणः ज्ञानादेव मुक्तिर्भवति इति। अतः ब्रह्मविषयिणी निरन्तरचित्तवृत्तिरेव निदिध्यासनम्। सर्वैरेव इन्द्रियैः ब्रह्मणः ज्ञानं सम्भवति। यथा चक्षुषा अयं घटः अस्ति इति घटस्य ज्ञानं भवति। तस्मिन् ज्ञाने घटस्य सत्ता ज्ञायते। न हि घटज्ञानादनन्तरं कस्यचित् सन्देहो भवति - घटः अस्ति न वेति। सत्ता च ब्रह्मणः एव। ब्रह्मणि अखिलस्य प्रपञ्चस्य आरोपात् ब्रह्म अधिष्ठानम्, प्रपञ्चश्च आरोप्यः। आरोपस्थले अधिष्ठानस्य अंशः आरोप्यज्ञाने भासते इत्येव नियमः। यथा शुक्तिरजतभ्रमस्थले इदं रजतमिति शुक्तौ विद्यमाना इदन्ता (सन्निकृष्टता) रजतज्ञाने रजताभेदेन ज्ञायते तथैव घटज्ञानस्थले ब्रह्मणः स्वरूपभूता सत्ता एव घटेन सह अभिन्नतया ज्ञायते। अतः चक्षुषा सत्ताग्रहणात् ब्रह्म ज्ञातमिति स्पष्टम्।<br><br>**अथवा**<br><br>समाधेः आवश्यकताविचारः<br><br>इदानीम् अयं प्रश्नः सुतरामुदेति यत् श्रवणमननाभ्याम् अनन्तरं निदिध्यासनस्य कथनात्, निदिध्यासनस्यैव ब्रह्मज्ञानं यावत् विधानात् कुत्र समाधेः अवसरः इति? यदि च निदिध्यासनाद् भेदेन समाधेः उपन्यासो भवति तर्हि द्रष्टव्यादिश्रुतेः अपलापः स्यात्। अत्रोच्यते, न हि समाधिः निदिध्यासनाद् व्यतिरिक्तः, येन श्रुतिविरोधः | 5 |

स्यात्। निदिध्यासनमेव समाधिः। अतः वेदान्तसारे निदिध्यासनस्वरूपकथनाद् अनन्तरमेव समाधिस्वरूपम् अकथयित्वा साक्षात् समाधिः द्विविध इति कथ्यते। निदिध्यासनमेव यदि समाधिः न स्यात् तर्हि निदिध्यासनात् परं सङ्गतिनिर्देशं विना साक्षात् समाधेः आलोचनम् अप्रासङ्गिकोपन्यास एव स्यात्। परन्तु निदिध्यासनसमाध्योः भेदाभावात् न तत्र अप्रासङ्गिकः उपन्यास आशङ्कनीयः।

विद्यारण्यस्वामिनस्तु निदिध्यासनलक्षणम् उक्त्वा ततो भिन्नतया समाधेः लक्षणमाहुः। तथाहि समाधिलक्षणं तेनैवं विधीयते -

1. "ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।
2. निवातदीपवच्चित्तं समाधिरभिधीयते॥" इति।

श्लोकार्थो हि - ध्यातारं ध्यानं च परित्यज्य यदा चित्तं ध्येयगतमेव भवति, ध्येये च निरवच्छिन्नतया निवातदीवत् तिष्ठति, सा स्थितिः समाधिः इत्युच्यते। अत्र समाधिपदेन निर्विकल्पकसमाधिः एव उपदिष्टः। शङ्कराचार्या अपि विवेकचूडामणौ निदिध्यासनाद् भेदेन समाधिमाहुः। उच्यते च विवेकचूडामणौ -

3. "श्रुतेः शतगुणं विद्यान्मननं मननादपि।
4. निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥" इति।

अत्रायं श्लोकार्थः - श्रुतेः शतगुणं गुरुत्वावहं भवति मननं, मननाद् लक्षगुणं गुरुत्वावहं भवति निदिध्यासनं, अनन्तं गुरुत्वावहः च निर्विकल्पकसमाधिः इति। किञ्च, निर्विकल्पकसमाधिः एव मोक्षं प्रति कारणमिति भगवता शङ्कराचार्येण प्रतिपाद्यते-

5. "अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा।
6. समाधिनाऽविकल्पेन तदाद्वैतात्मदर्शनम्॥" इति।

अत्रार्थो हि - यदा निर्विकल्पकसमाधिना अद्वैतस्य आत्मनः ज्ञानं भवति तदा एव अज्ञानरूपहृदयग्रन्थीनां निःशेषं विलयो भवति इति।

| | | |
|---|---|---|
| | | |
| 51. | • विवेकानन्ददर्शनस्य सामान्यप्रस्तावः अर्थात् वेदान्तस्य अधुनिकेषु प्रचारकेषु अन्यतमस्य विवेकानन्दस्य दर्शनं सर्वभावसमन्वयपरकत्वेन प्रसिद्धम्।<br><br>• तस्य गुरोः श्रीरामकृष्णस्य मोक्षप्रापकत्वेन सर्वेषां धर्मसम्प्रदायानां समन्वयप्रदर्शनम्<br>शिवमहिम्नस्तोत्रसम्मतिः<br><br>• अद्वैत-विशिष्टाद्वैत-द्वैतमतानां समन्वयः<br><br>• प्रायोगिकजीवने वेदान्तस्य व्यवहारेण चतुर्णां कर्म-भक्ति-राज-ज्ञानयोगानां समन्वयः। | 5 |